आचार्य मम्मट कृत

# काव्यप्रकाश

## **प्रथम उल्लासः**

### मंगलाचरण

ग्रन्थारम्भे विघ्नविघाताय समुचितेष्टदेवतां ग्रन्थकृत् परामृशति-

नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम् ।

नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति ।। 1

नियतिशक्या नियतरूपा सुखदुःखमोहस्वभावा परमाणु आदि उपादान कर्मादिसहकारिकारण परतन्त्रा षड् रसा न च हृद्यैव तैः तादृशी ब्रह्मणो निर्मितर्निर्माणम् । एतद् विलक्षणा तु कविवाङ्निर्मितः, अत एव जयति । जयति इति अर्थेन च नमस्कार आक्षिप्यत इति तां प्रत्यस्मि प्रणत इति लभ्यते ।

### काव्यप्रयोजन

इहाभिधेयं सप्रयोजनमित्याह

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।

सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ।। 2

कालिदासादीनामिव यशः, श्रीहर्षादेधावकादीनामिव धनम्, राजादिगत उचित आचार परिज्ञानम्, आदित्यादेर्मयूरादिनामिव अनर्थनिवारणम्,

सकलप्रयोजन मौलिभूत समनन्तरमेव रसास्वादन समुद्भूतं विगलितवेद्यान्तरम् आनन्दं, प्रभुसम्मितशब्दप्रधानवेदादिशास्त्रेभ्यः सुहृत्सम्मितार्थतात्पर्यवत् पुराणादीतिहासेभ्यश्च शब्दार्थयोर्गुणभावेन रसांगभूतव्यापारप्रवणतया विलक्षणं यत्काव्यं लोकोत्तरवर्णनानिपुणकविकर्म तत् कान्तेव सरसतापादनेनाभिमुखीकृत्य रामादिवत् वर्तितव्यं न रावणादिवत् इति उपदेशं च यथायोगं कवेः सहृदयस्य च करोतीति सर्वथा तत्र यतनीयम् ।

## काव्यहेतु (कारण)

एवमस्य प्रयोजनमुक्त्वा कारणमाह-

शक्तिर्निपुणता लोकशास्त्रकाव्याद्येवेक्षणात् ।

काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे ।। 3

शक्तिः कवित्वबीजरूपः संस्कारविशेषः । यां विना काव्यं न प्रसरेत प्रसृतं वा उपहसनीयं स्यात् । लोकस्य स्थावरजंगमात्मकलोकवृत्तस्य शास्त्राणां छन्दोव्याकरण- अभिधानकोशकलाचतुर्वर्ग जगतुरगखड्गादिलक्षणग्रंथानां काव्यानां च महाकविसम्बधिनाम्, आदिग्रहणादितिहासादीनां च विमर्शनाद् व्यत्पत्तिः । काव्यं कर्तुं विचारयितुं च ये जानन्ति तदुपदेशेन करणे योजने च पौन पुण्येन प्रवृत्तिरिति त्रयः समुदिता न तु व्यस्तास्तस्य काव्यस्योद्भ्वे निर्माणे समुल्लासे च हेतुर्न्न तु हेतवः।

काव्यलक्षण

तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि ।

उत्तमकाव्य लक्षण

इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्यात् ध्वनिर्बुधैः कथितः ।। 4

मध्यम काव्य

अतादृशि गुणीभूत व्यङ्ग्यं तु मध्यमम् ।

अवर काव्य

शब्दचित्र वाच्यचित्रम् अव्यङ्ग्यं तु अवरं स्मृतम् ।। 5